# Shiv Bilvashtakam Lyrics

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधं ||
त्रिजन्म पापसंहारम् ऐकबिल्वं शिवार्पणं ||

त्रिशाखैः बिल्वपत्रैश्च अच्चिद्रैः कोमलैः शुभैः ||
तवपूजां करिष्यामि ऐकबिल्वं शिवार्पणं ||

कोटि कन्या महादानं तिलपर्वत कोटयः ||
काञ्चनं क्षीलदानेन ऐकबिल्वं शिवार्पणं ||

काशीक्षेत्र निवासं च कालभैरव दर्शनं ||
प्रयागे माधवं दृष्ट्वा ऐकबिल्वं शिवार्पणं ||

इन्दुवारे व्रतं स्थित्वा निराहारो महेश्वराः ||
नक्तं हौष्यामि देवेश ऐकबिल्वं शिवार्पणं ||

रामलिङ्ग प्रतिष्ठा च वैवाहिक कृतं तधा ||
तटाकानिच सन्धानम् ऐकबिल्वं शिवार्पणं ||
अखण्ड बिल्वपत्रं च आयुतं शिवपूजनं ||
कृतं नाम सहस्रेण ऐकबिल्वं शिवार्पणं ||

उमया सहदेवेश नन्दि वाहनमेव च ||
भस्मलेपन सर्वाङ्गम् ऐकबिल्वं शिवार्पणं ||

सालग्रामेषु विप्राणां तटाकं दशकूपयोः ||
यज्नकोटि सहस्रस्च ऐकबिल्वं शिवार्पणं ||

दन्ति कोटि सहस्रेषु अश्वमेध शतक्रतौ ||
कोटिकन्या महादानम् ऐकबिल्वं शिवार्पणं ||

बिल्वाणां दर्शनं पुण्यं स्पर्शनं पापनाशनं ||
अघोर पापसंहारम् ऐकबिल्वं शिवार्पणं ||

InstaAstro

सहस्रवेद पाटेषु ब्रह्मस्तापन मुच्यते ॥
अनेकव्रत कोटीनाम् ऐकबिल्वं शिवार्पणं ॥

अन्नदान सहस्रेषु सहस्रोप नयनं तधा ॥
अनेक जन्मपापानि ऐकबिल्वं शिवार्पणं ॥

बिल्वस्तोत्रमिदं पुण्यं यः पठेश्शिव सन्निधौ ॥
शिवलोकमवाप्नोति ऐकबिल्वं शिवार्पणं ॥

InstaAstro